संस्कृत-वार्ताः
17.07.2024
सायम् - 06:20

**मुख्यवार्ताः**

· माइक्रोसॉफ्ट इत्यस्य सेवायाः अवरुद्धानन्तरं अद्य सर्वेषु विमानस्थात्रेषु विमान-संचालन-प्रक्रिया सामान्यरूपेण समारब्धा अस्ति ।

· सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं श्वः सर्वदलीयोपवेशनम् आहूतम् अस्ति ।

· राष्ट्रिय-परीक्षाभिकरणम्- एन टी ए इत्यनेन नीट-स्नातक-प्रवेश-परीक्षायाः परिणामः परीक्षा-केन्द्रानुसारं स्वकीयान्तर्जालपटले उद्घोषितः अस्ति।

· बांग्लादेशे प्रवर्तमानं आरक्षण-विरुद्ध-प्रदर्शनम् वीक्ष्य सहस्राधिकाः भारतीयच्छात्राः भारतं प्रत्यावर्तिताः ।

· महिला-एशिया-विंशति-प्रति-विंशति-क्रिकेट-चषके, थाईलैंड-दलेन मलेशियादलं द्वाविंशति-धावनाङ्कैः परीजितम् ।

**विमान-संचालनम्-पुनरारब्धम्**

नागर-विमानन-मंत्रालयेन प्रोक्तं यत् सर्वेषु विमानस्थात्रेषु विमान-संचालन-प्रक्रिया सामान्यरूपेण समारब्धा अस्ति । माइक्रासॉफ्ट इत्यस्मिन् जातेन अवरोधेन ह्यः विमानसेवाः प्रभाविताः अभवन् । एकस्मिन् वक्तव्ये मंत्रालयेन प्रोक्तं यत्, यत्किमपि अवरोधं आपतितम् आसीत् तत् दूरीकर्तुं प्रयासः क्रियते । इदमपि कथितं यत् सर्वकारेण विमान-परिचालनं निरन्तरं निरीक्ष्यते । विमानसेवा-प्रदातृ-संस्थानानि यात्रायाः समायोजनं यात्राशुल्कस्य प्रत्यावर्तनम् अपि सुनिश्चितं कुर्वन्ति ।

**वित्तसङ्कल्पनासत्रम्-उपवेशनम्**

सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं श्वः सर्वदलीयोपवेशनम् आहूतम् अस्ति । उपवेशनावधौ सर्वकारः संसदः द्वयोः सदनयोः सुचारु-सञ्चालनाय सर्वाणि विपक्षिदलानि सहयोगाय प्रार्थयिष्यति । वित्त-सङ्कल्पना-सत्रं सोमवासरात् समारभ्य: आगामिमासस्य द्वादशदिनाङ्कं यावत् प्रचलिष्यति । सामान्य-वित्तसङ्कल्पना-प्रपत्रम् मंगलवासरे प्रस्तोष्यते । एतत् नरेन्द्रमोदिनः सर्वकारस्य तृतीयकार्यकालस्य प्रथमं वित्त-सङ्कल्पना-सत्रम् अस्ति । विगते मासे संसदः द्वयोः सदनयोः संयुक्तोपवेशनं सम्बोधयन्ती राष्ट्रपतिः द्रौपदी-मुर्मुवर्या अकथत् यत् एतत्-वित्तसङ्कल्पना-प्रपत्रं सर्वकारस्य दूरगामि-नीतिनां भविष्योन्मुखस्य दृष्टिकोणस्य च प्रभाविप्रमाणं भविष्यति ।

**नीट-परीक्षापरिणामः**

राष्ट्रिय-परीक्षाभिकरणम्- एन टी ए इत्यनेन नीट-स्नातक-प्रवेश-परीक्षायाः परिणामः परीक्षा-केन्द्रानुसारं स्वकीयान्तर्जालपटले उद्घोषितः अस्ति। एन टी ए इत्यनेन सर्वोच्च-न्यायालयस्य निर्देशानन्तरं परिणामः अन्तर्जालपटले उद्घोषितः अस्ति । इतः पूर्वं न्यायालयेन एन टी ए प्रत्याशिनां परिचयरहितः परीक्षापरिणामः परीक्षाभिकरणस्य स्वकीये अन्तर्जालपटले अद्य द्वादशवादनं यावत् समुद्घोषितुं निर्देशः प्रदत्त आसीत् । परीक्षापरिणामः अधुना neet.ntaonline.in इति अन्तर्जालपटले समुपलब्धो वर्तते ।

## बांग्लादेश-विरोधप्रदर्शनम्::

बांग्लादेशे प्रवर्तमानं आरक्षण-विरुद्ध-प्रदर्शनम् अधिकृत्य प्रदर्शनकारिणां सुरक्षाबलानां च मध्ये जाते सङ्घर्षे न्यूनातिन्यूनाः चतुरधिकैकशतं जनाः मारिताः , पञ्चशताधिक-द्विसहस्रं जनाः च व्रणिताः जाताः , येन भारतीयच्छात्राः भारतं प्रत्यावर्तितुं विवशाः अभवन् । अवधेयं यत् प्रतिवेशि-देशे प्राशासनिक-सेवासु पुनरारक्षणं विरुध्य केभ्यचित् सप्ताहेभ्यः व्यापकं विरोध-प्रदर्शनं प्रचलति । उत्तर-प्रदेश,हरियाणा, मेघालय,जम्मू-कश्मीर-राज्याणां छात्राः, सुरक्षानुरक्षण-माध्यमेन षट्-होरात्मिकां चिरयात्रां विधाय ह्यः पूर्वोत्तर-सीम्नः भारतं प्रत्यावर्तिताः। अन्तर्जालसेवायाः पिधानेन दूरभाष-सेवानां च प्रभावितेन भारतीय-छात्राणां निजपरिवारैः सह सम्पर्कः बाधितः जातः ,येन ते अस्थायि-रूपेण बांग्लादेशं परित्यज्य भारतं प्रत्यावर्तितुं विवशाः अभवन् । छात्राणां, सर्वकार-समर्थकानां, सुरक्षा-बलानां च मध्ये सङ्घर्षः विगते मासे समारब्धः, यद्यपि सोमवासरे सङ्घर्षः विवर्धितः यदा ढाका-विश्वविद्यालये छात्राणां मध्ये विवादः सञ्जातः , यस्मिन् मंगलवासरे षट्-जनानां मृत्युरभवत् येन सर्वकारः सर्वान् विश्वविद्यालयान् पिनद्धुम् आदेशं प्रायच्छत्। विदेशराज्य-मंत्री कीर्तिवर्धन-सिंहेन बांग्लादेशे शिक्षारतानां भारतीय-छात्राणां सुरक्षायै आश्वासनं प्रदत्तम् अस्ति।

## स्वास्थ्यमन्त्रालयः-कोविडमृत्युः

सर्वकारः प्रोक्तवान् यत् साइंस्-एडवांसेज-पत्रिकायां भारते विंशत्युत्तर-द्विशत-तमाब्दे कोविड-नवदश-महामार्याः अवधौ अत्यधिक-मृत्यु-प्रतिशततां प्रदर्शयन्ती सूचना तथ्यहीनास्वीकार्यानुमानयोः आधारिता वर्तते। स्वास्थ्य-मन्त्रालयेन प्रोक्तं यत् पत्रिकायां प्रकाशितम् अध्ययनं त्रुटिपूर्णम् अस्ति सहैव लेखकैः स्वीकृतायां पद्धत्यां अनेकानि आधारभूतानि त्रुटयः सन्ति । मंत्रालयेन प्रोक्तम् यत् पत्रिकायां प्रकाशितानि तथ्यानि असंगतानि तथ्यहीनानि च सन्ति ।

## विदेशसचिवः-भूटानयात्रा

विदेश-सचिवः विक्रम-मिस्री तस्य भूटानीयः समकक्षः औम-पेमा-चोडेनः च अद्य भूटाने तृतीयायाः भारत-भूटान-विकास-सहयोग-वार्तायाः सहाध्यक्षताम अकुरुताम् । उपवेशनावधौ , द्वावेव विदेश-सचिवौ त्रयोदशतम्याः पंचवर्षीय-योजनायाः अन्तर्गतं विकाससहयोगस्य विभिन्नक्षेत्रेषु कार्यान्वयनशैल्याः सहयोगस्य च समीक्षां कृतवन्तौ । ध्यानास्पदं वर्तते यत् श्रीमिस्री भूटानस्य द्वि-दिवसीयायाम् आधिकारिक-यात्राम् अस्ति। विदेश-सचिवः विक्रम-मिस्री ह्यः भूटानस्य प्रधानमन्त्री शेरिंग-टोबगे इत्यनेन सह मेलनम् अकरोत् । श्रीमिस्री भूटानेन सह भारतस्य घनिष्ठ-मैत्रि-सम्बन्धान् भारत-भूटानयोः परस्पर-सम्बन्धान् च समधिकं सुदृढं कर्तुं भारतस्य प्रतिबद्धतां प्रकटितवान् ।

## नीट-रांची- RIMS

रांची-जनपदस्थेन (राजेंद्र इंस्टीट्यूट ऑफ मेडिकल साइंस) इत्यस्य प्रबंधनेन, नीट-स्नातक-प्रवेश-परीक्षायाः प्रश्नपत्र-प्रकाशन-प्रकरणे संलिप्ततायाः अनन्तरं एमबीबीएस-द्वितीय-वर्षस्य छात्रा सुरभिः कुमारी इत्येषा निलम्बिता सञ्जाता । नीट-स्नातक-परीक्षावधौ सुरभि-कुमारी इत्यस्याः सर्वासां गतिविधीनाम् अन्वीक्षणं विधातुं प्रबंधनसमित्या पांच-सदस्यानां दलस्य सङ्घटनं विनिर्मितम् अस्ति । केन्द्रीयान्वीक्षणविभागेन सा तस्य छात्रावासात् निगडिता अपि च अग्रिमायै प्रश्नपृच्छायै त्रिदिवसानां निगडने प्रेषिता अस्ति । प्रश्नपृच्छायाः

अवधौ सुरभिकुमारी इत्यनया स्वीकृतं यत् प्रश्नपत्र-पूर्वप्रकाशनप्रकरणे तया एव परीक्षाप्रश्नपत्रस्य उत्तराणि लिखितानि । अवधेयं यत् निगडिता सुरभि-कुमारी झारखंडराज्यस्य रामगढ़-जनपदस्य मूल-निवासिनी अस्ति।

**महिला-क्रिकेटस्पर्धा**

महिला-एशिया-विंशति-प्रति-विंशति-क्रिकेट-चषके, थाईलैंड-दलेन श्रीलंकायाः रांगिरी-दांबुला-अंतर्राष्ट्रिय-क्रिकेट-क्रीडाङ्गणे अद्य सायं मलेशियादलं द्वाविंशति-धावनाङ्कैः परीजितम् । चतुस्त्रिंशदुत्तरैकशतं धावनाङ्कानां लक्ष्यम् अनुसरता मलेशिया-दलेन अष्टक्रीडकानां हानौ एकादशोत्तरैकशतं धावनाङ्काः एव समर्जिताः । पणकं विजित्य सर्वप्रथमं थाईलैण्डदलेन त्रयस्त्रिंशतदुत्तरैकशतं धावनाङ्काः समर्जिताः । द्वितीये क्रीडाद्वन्द्वे श्रीलङ्का अद्य सायं दांबुलायाः तस्मिन्नेव क्रिकेट-क्रीडाङ्गणे बांग्लादेश-दलं सम्मुखीकरिष्यति । क्रीडास्पर्धा भारतीय-समयानुसारं सायं सप्तवादने समारप्स्यते । विगतसायं , पूर्वविजेतृदलेन भारतेन दांबुलायां क्रीडास्पर्धायाः प्रारम्भिके क्रीडाद्वन्द्वे पाकिस्तानः सप्तक्रीडकानां हानौ पराजितः।

**ऋतुविभागः/पूर्वानुमानम्**

भारतस्य ऋतुविभागेन अद्य गुजरात, गोवा, मध्यमहाराष्ट्र, दक्षिण छत्तीसगढ़ेषु अतिवृष्टिः पूर्वानुमानितम् अस्ति। ऋतुविभागेन उक्तं यत्, ओडिशायां, तटीय आन्ध्रप्रदेशे, तेलङ्गानायां चापि प्रचण्डवृष्टिः सम्भविष्यति। आगामिषु चत्वारि-पञ्च-दिवसेषु गुजराते अतिवृष्टिः निरन्तरं भवितुं शक्नोति। मत्स्यजीविभ्यः परामर्शः प्रदत्तः यत् ते अद्य उत्तर पश्चिम,पश्चिम-मध्य-बङ्ग-खात्यां, उत्तर-आन्ध्र-प्रदेशे-, ओडिशा, पश्चिमबङ्ग-समीपस्थेषु बाङ्गलादेश-तटेषु कार्यं न कुर्वन्तु इति।

।। इति वार्ता: ।।